हरिः
हरिः

भुजः। हृतिः। इति मेदिनी ॥ (यथा, भागवते।१०।५०।८।
"एतदर्थोऽवतारोऽयं भूभारहरणाय मे।
संरक्षणाय साधूनां कृतोऽन्येषां वधाय च ॥")
शुक्रम्। स्वर्णम्। कपर्दकम्। उष्णोदकम्। इति केचित् ॥ भाज्याङ्कात् भाजकाङ्कहारा-भागग्रहणम्। इति लीलावती ॥

हरतेजः, [स्] क्ली, (हरस्य तेजः।) पारदम्। इति राजनिर्घण्टः ॥ शिववीर्य्यञ्च ॥

हरनेत्रं, क्ली, (हरस्य नेत्रम्।) शिवचक्षुः। संख्यात्रयम्। इति ज्योतिःशास्त्रम् ॥

हरबीजं, क्ली, (हरस्य बीजम्।) पारदम्। इति भूरिप्रयोगः ॥

हररूपः, पुं, (हरस्य रूपमिव रूपमस्य।) शिवः। इति शब्दरत्नावली ॥

हरशेखरा, स्त्री, (हरस्य शेखरं आवासत्वेना-स्त्यस्या इति। अच्।) गङ्गा। इति हेमचन्द्रः ॥

हरहूरा, स्त्री, हारहूरा। द्राक्षा। इति केचित् ॥

हराद्रिः, पुं, (हरस्य अद्रिः।) कैलासपर्व्वतः। इति केचित् ॥ (यथा, कथासरित्सागरे।११३।८८।
"विद्याधराः शृणुत यः कुरुते ममाच
धर्म्मव्यतिक्रममितः प्रभृति प्रजासु।
वध्य स मे नियतमित्यभितो हराद्रि-
सुद्घोषणाच्च स ततो भ्रमयाञ्चकार ॥")

हरिः, पुं, (हरति पापानीति। हृ+"हृपिषि-रुहीति।" उणा० ४।१२८। इति इन्।) विष्णुः। (यथा, रघुः।१०।८६।
"हरिरिव युगदीर्घैर्दोर्भिरंशैस्तदीयैः
पतिरवनिपतीनां तैश्चकाशे चतुर्भिः ॥")
सिंहः। (यथा, रघुः।२।५८।
"स न्यस्तशस्त्रो हरये स्वदेह-
मुपानयत् पिण्डमिवामिषस्य।")
शुकपक्षी। सर्पः। वानरः। भेकः। इत्यमरः ॥ चन्द्रः। सूर्य्यः। वायुः। अश्वः। (यथा, महाभारते।३।१६६।५।
"ततः स हरिभिर्युक्तं जाम्बूनदपरिष्कृतम्।
मेघनादिनमारुह्य श्रिया परमया ज्वलन् ॥")
यमः। शिवः। ब्रह्मा। किरणः। इन्द्रः। (यथा, रघुः।१२।१०३।
"यन्ता हरेः सपदि संहृतकार्म्मुकज्य-
मापृच्छ्य राघवमनुष्ठितदेवकार्य्यम् ॥")
वर्णविशेषः। इति मेदिनी ॥ मयूरः। कोकिलः। हंसः। अग्निः। इति शब्दरत्नावली ॥ भर्तृ-हरिः। इति त्रिकाण्डशेषः ॥ पिङ्गवर्णः। हरिद्वर्णः। इति हेमचन्द्रः ॥ * ॥ हरेरष्टोत्तर-शतनामानि यथा,—

गौतमादि उवाच।

श्रीकृष्णाष्टोत्तरशतं नाम मङ्गलदायकम्।
तत्शृणुष्व महाभाग! सर्व्वकल्मषनाशनम् ॥
श्रीकृष्णः पुण्डरीकाक्षो ह्यधोक्षजो जनार्दनः।
नारायणो हरिर्व्विष्णुर्माधव पुरुषोत्तमः ॥
गोविन्दः केशवोऽनन्तो वामनो मधुसूदनः।
दामोदरो हृषीकेशः पद्मनाभस्त्रिविक्रमः ॥
वैकुण्ठश्चाच्युतो रामश्चक्रपाणिरधोक्षजः।
पीताम्बरो जगन्नाथो नृसिंहो गरुड़ध्वजः ॥
राधिकापतिरानन्दस्वरूपो विश्वमोहनः।
यशोदानन्दनः सत्यः श्रीगोपीजनवल्लभः ॥
गदाधरो हयग्रीवो वराहश्च गवीश्वरः।
गोवर्द्धनधरो विश्वबीजं कमललोचनः ॥
सर्व्वान्तर्य्यामी जगदीशश्चानूरमर्द्दनः प्रभुः।
विश्वम्भरो यज्ञभोक्ता वनमाली सनातनः ॥
पुराणपुरुषो नन्दात्मजः श्रीवत्सलाञ्छनः।
देवकीनन्दनः श्यामः श्रीश्यामाप्राणवल्लभः ॥
अनिरुद्धः परं ब्रह्म मुरारिः श्रीधरस्तथा।
श्रीगोपीमोहनः शार्ङ्गधन्वा तु ब्राह्मणप्रियः ॥
ब्रह्मण्यदेवः चैत्रञ्चस्तापत्रयविनाशनः।
कैटभारिर्गुणातीतो रुक्मिणीरमणो विराट् ॥
सङ्कर्षणः शेषशायी दैत्यारिर्व्वकभित्तथा ॥
सर्व्वशास्त्रप्रणेता च मुकुन्दो भक्तवत्सलः ॥
अघासुरघ्नः प्रद्युम्नो हंसश्च मुरलीधरः।
कुवलयापीड़घाती च पद्मधारी चतुर्भुजः ॥
भक्तलोकैकशरणो गोपालो वैष्णवप्रियः।
वंशीपाणिर्गुणमयः कोटिकन्दर्पमोहनः ॥
वेणुवाद्यविनोदी च कंसारिर्यादवस्तथा।
चतुर्व्वेदमयो नित्यः सच्चिदानन्दविग्रहः।
दीनानाथैकशरणं भक्तानुग्रहकारकः ॥*॥
एतदष्टोत्तरशतं कृष्णनाम नृमङ्गलम्।
प्रत्यहं यः पठेत् प्रातस्त्रिसन्ध्यां वा विशेषतः ॥
द्विजादिश्चेन्नरो भक्त्या शृणोति जपति स्मरेत्।
दुःस्वप्ननाशनं तस्य मनोमलविनाशनम्।
सर्व्वापराधशमनं सर्व्वपापक्षयो भवेत्।
पावनं शान्तिदं पुण्यं तापत्रयविनाशनम् ॥
आयुष्यं सर्व्वसुखदं सर्व्वदुःखापहं मुने!।
व्रतयज्ञतपोदानयागतीर्थफलप्रदम् ॥
पुत्त्रदं चाशु वन्ध्यानां ग्रहपीड़ादिनाशनम्।
सर्व्वाभीष्टप्रदं सर्व्वैश्वर्य्यदं विघ्ननाशनम् ॥
सर्व्वोपद्रवदारिद्र्यनाशनं मानवस्य तु।
सद्बुद्धिविद्याविज्ञानयशोधर्म्मप्रदं तथा ॥
सर्व्वभीतिहरं भक्तिमुक्तिधान्यधनप्रदम्।
सर्व्वरोगक्षयकरं बाह्यान्तःशुद्धिदं परम् ॥
फलकामिनो वैष्णवस्य सर्व्वकामफलप्रदम्।
सर्व्वशत्रुक्षयो याति हरिभक्तिश्च जायते ॥
सरस्वती च वशगा कमलाविरतं भवेत्।
क्षेत्रतीर्थे च मरणं गङ्गायां वा विशेषतः ॥
मोचनं भवबन्धस्य यमभीतिविनाशनम्।
निष्कामिनस्त्वनन्यस्य प्रेमभक्तिसुखप्रदम्।
भवेदहैतुकं ज्ञानं साक्षात् कृष्णः प्रसीदति ॥"
इति पाद्मोत्तरखण्डे १११ अध्यायः ॥*॥
श्रीहरिपादचिह्नाणि यथा,—

श्रीसदाशिव उवाच।

"सच्चिदानन्दरूपस्य कृष्णस्याद्भुतकर्म्मणः।
संस्मरेत् पादचिह्नानि प्रातर्भक्त्या नरोत्तमः ॥
अतिगुह्यानि देवर्षे! यानि भक्तिप्रदानि च।
सर्व्वसुखप्रदानीह तव प्रोक्तानि वेधसा ॥
मयापि भुवनैश्वर्य्यै कथितानि प्रयत्नतः।
पुरासौ तुष्टचित्ताभूत् श्रुत्वा कृष्णसुखप्रदा ॥

दिलीप उवाच।

कानि कानि च चिह्नानि कृष्णस्य पादयो-र्म्मुने।
वशिष्ठ! श्रोतुमिच्छामि कथयस्वानुपूर्व्वकम् ॥

वशिष्ठ उवाच।

यदूचिवान् स्वयं ब्रह्मा नारदाय नराधिप!।
तत् शृणुष्व महत् पुण्यमतिगोप्यतमं वचः ॥
विधिर्द्देवर्षिणा पृष्ट उपाख्यानमिदं पुरा।
महाभागवतं पुण्यमेकदा तमुवाच ह ॥

ब्रह्मोवाच।

शृणु नारद वक्ष्यामि पादयोश्चिह्नलक्षणम्।
भगवत्कृष्णरूपस्य ह्यानन्दैकरसस्य च ॥
अवताराः ह्यसंख्याश्च कथिता ये तवाग्रतः।
परं सम्यक् प्रवक्ष्यामि कृष्णस्तु भगवान् स्वयम् ॥
देवानां कार्य्यसिद्ध्यर्थमृषीणां वा नृणां तथा।
आविर्भूतस्तु भगवान् स्वानां प्रियचिकीर्षया ॥
केनैव ज्ञायते देवो भगवान् भक्तवत्सलः।
तान्यहं वेद्मि नान्योऽस्ति सत्यमेतन्मयोदितम् ॥
ऊनविंशतिचिह्नानि मया दृष्टानि तत्पदे।
दक्षिणे दश चिह्नानि वामे च नव नारद! ॥
ध्वजातपत्रं कमलं वज्राख्यमङ्कुशो यवः।
स्वस्तिकं चोर्द्धरेखा चाष्टकोणं चक्रमेव च ॥*॥
नवान्यानि प्रवक्ष्यामि साम्प्रतं वैष्णवोत्तम!।
चिह्नानि वामचरणे गोविन्दस्याङ्कितानि च ॥
इन्द्रचापं त्रिकोणञ्च कलसञ्चार्द्धचन्द्रकम्।
शङ्खोऽम्बरं मत्स्यचिह्नं गोष्पदं जाम्बवं स्मृतम् ॥
अङ्कान्येतानि भो विप्र! दृश्यन्ते च यदा कदा।
कृष्णाख्यन्तु परं ब्रह्म भुवि जातं न संशयः ॥
द्वयं वाथ त्रयं वाथ चत्वारः पञ्च एव वा।
दृश्यन्ते ब्रह्मवित्श्रेष्ठ ह्यवताराः कथञ्चन ॥
मध्ये ध्वजा तु विज्ञेया पद्मं द्व्यङ्गुलमानतः।
वज्रन्तु दक्षिणे पार्श्वे चाङ्कुशो वै तदग्रतः ॥
यवोऽप्यङ्गुष्ठमूले स्यात् स्वस्तिकं तत्र कुत्र-चित्।
आतपत्रं चोर्द्धरेखा वामे चक्रञ्च दक्षिणे ॥
आद्यमङ्गुलिमारभ्य यावद्वै मध्यमा स्थिता।
तावद्वै चोर्द्धरेखा च कथिता पद्मसंज्ञके ॥
अष्टकोणं ततो वत्स! समानाष्टाङ्गुलैश्च तत्।
निर्द्दिष्टं दक्षिणे पादे चेत्याहुर्म्मुनयो हरेः *॥
एवं पादस्य चिह्नानि नान्यं वहति वैष्णवः।
दक्षिणेतरस्थानानि संवदामीह संस्मरेत् ॥
चतुरङ्गुलमानेन द्व्याङ्गुलिसमीपतः।
इन्द्रचापं ततो विद्यादन्यत्र च न ते क्वचित् ॥
त्रिकोणं मध्यनिर्द्दिष्टं कलसो यत्र कुत्रचित्।
अष्टाङ्गुलप्रमाणेन तद्वेरर्द्धचन्द्रकम्
अर्द्धचन्द्रसमाकारं कलसो निर्द्दिष्टं तस्य सुव्रत।
इन्द्रं वै यच्च चिह्नन्तु ह्याद्यन्ते वै निरूपितम् ॥
त्रिकोणं दक्षिणे भागे त्वम्बरं तदधो यवः।
जम्बूफलं त्रिकोणस्य वामपार्श्वे निरूपितम् ॥